# Shri Mangalacharyamahamunindrapranitam Prapatti Panchakam

# શ્રીમઙ્ગલાચાર્યમહામુનીન્દ્રપ્રણીતં પ્રપત્તિપઞ્ચકમ્

## Document Information

Text title : Shri Mangalacharyamahamunindrapranitam Prapatti Panchakam

File name : prapattipanchakammangalAchAryamahAmunIndra.itx

Category : raama, rAmAnanda, panchaka, prapatti

Location : doc_raama

Author : maNgalAchAryamahAmunIndra

Transliterated by : Mrityunjay Pandey

Proofread by : Mrityunjay Pandey

Description/comments : From Chatuh Sampradaya Dig-Darshanm

Latest update : December 3, 2023

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 3, 2023

*sanskritdocuments.org*

# શ્રીમઙ્ગલાચાર્યમહામુનીન્દ્રપ્રણીતં પ્રપત્તિપઞ્ચકમ્

મૂલં સ્થાવરજઙ્ગમસ્ય જગતો જન્માદિસમ્પાદકઃ
પૂર્ણં બ્રહ્મ ગુણામ્બુધિર્ભવહરઃ સર્વાવતારી સ્વરાટ્ ।
મુક્તામુક્તસુરેશ્વરૈઃ શ્રુતિગણૈર્બ્રહ્મર્ષિભિઃ સંસ્તુતઃ
શ્રીરામઃ સકલેશ્વરઃ સકલવિત્ પાયાદપાયાત્ સદા ॥ ૧॥

યા વિશ્વાર્ત્તિહરી ચ વિશ્વજનની બ્રહ્માદિદેવૈઃ સ્તુતા
યા વિભ્વી વિભુવૈભવા ચ વિભુદા સૌન્દર્યવારાન્નિધિઃ ।
યા રામસ્ય પરાત્મનો ભગવતઃ પ્રાણપ્રિયા મુક્તિદા
સા સીતા સકલેશ્વરી ભગવતી પાયાદપાયાત્ સદા ॥ ૨॥

ભક્તિજ્ઞાનબલામ્બુધિઃ કરણજિદ્ ભક્તિપ્રદો વિઘ્નહા
વીરાણાં સુશિરોમણિઃ સુરનુતઃ શ્રીરામમન્ત્રપ્રદઃ ।
વજ્રાઙ્ગશ્ચ મનોજવઃ પવનજઃ શ્રીજાનકીશોકહૃદ્
દાસઃ શ્રીરઘુનાયકસ્ય હનુમાન્ પાયાદપાયાત્ સદા ॥ ૩॥

પ્રસ્થાનત્રયભાષ્યકૃચ્છુભવિશિષ્ટાદ્વૈતસંરક્ષકઃ
સિદ્ધપ્રાજ્ઞનૃપાલદેવનિચયૈઃ સંસેવિતો યોગિરાટ્ ।
શ્રીમદ્વૈષ્ણવધર્મપા ગુણનિધિઃ શ્રીરામભક્તિપ્રદો
રામાનન્દજગદ્ગુરુર્યતિપતિઃ પાયાદપાયાત્ સદા ॥ ૪॥

યોગીન્દ્રઃ શ્રુતિધર્મરક્ષકમણિઃ કારુણ્યપાથોનિધિઃ
સીતારાઘવભક્તિદઃ સુરતરુઃ સિદ્ધૈઃ સમાસેવિતઃ ।
રામાનન્દમતામ્બુધેશ્ચ પરિતઃ સંવર્દ્ધકશ્ચન્દ્રમા-
શ્ચીલાચાર્યજગદ્ગુરુર્વ્રતિપતિઃ પાયાદપાયાત્ સદા ॥ ૫॥

સદાચાર્યસુરેન્દ્રશ્રીમઙ્ગલાચાર્યનિર્મિતમ્ ।
પઠતાં પઞ્ચકઞ્ચૈદ્ ભવતાન્મઙ્ગલપ્રદમ્ ॥ ૬॥

ઇતિ શ્રીમઙ્ગલાચાર્યમહામુનીન્દ્રપ્રણીતં પ્રપત્તિપઞ્ચકં સમ્પૂર્ણમ્ ।

Encoded and proofread by Mrityunjay Pandey

*Shri Mangalacharyamahamunindrapranitam Prapatti Panchakam*

pdf was typeset on December 3, 2023

Please send corrections to *sanskrit@cheerful.com*